॥ श्री ॥

॥अथ प्रश्नोत्तर निर्णय प्रारंभः॥ श्रीहरि॥

॥परस्नाम भट्ट जोगवेकर याचे पुस्तक॥



प्र. नि. १

श्रीगणेशायनमः॥ हरिः ॐ॥ सप्तर्षयोऽगस्याष्टमास्तदपत्यंचगोत्रं॥ प्रत्रि
यंते होत्राध्वर्युभ्यामुत्कीर्यंत इतिप्रवराः॥ समानप्रवरांसमानगोत्रांचनोद्व
हेत्॥ पंचानांत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः॥ फग्वंगिरोगणेषेवंत्रो
षोयेकोपिवार्यतइतिपरिभाषा॥ यानधिकृत्यप्रवराआम्नातास्ताद्दग्गा
णाऊनपंचात्रात्॥ तद्याहि॥ भृगूणांसप्तानंतर्गणाः॥ तत्रत्रयोजामदग्न्याः॥
वत्साविदाआर्ष्टिषेणाश्चेति॥ तत्रवत्सानांपंचप्रवराः॥ भार्गवच्यावनाप्नवा
नौर्वजामदग्न्येति॥ त्रयोवा॥ भार्गवौर्जौर्वजामदग्न्येति॥१॥ विदानांपंचप्रव
राः॥ भार्गवच्यावनाप्नवानौर्वविदेति॥ त्रयोवा॥ भार्गवौर्वजामदग्न्येति॥२॥
आर्ष्टिषेणानांपंचप्रवराः॥ भार्गवच्यावनाप्नवानार्ष्टिषेणान्नपेति॥३॥ए रा म
वांत्रयाणांपरस्परमविवाहः॥ गोत्रैक्यात्प्रवरैक्याच्च॥ आर्ष्टिषेणानांके १

वलभार्गववेतिस्मरन्नर्थसारादिमतेपिविदवत्साभ्यांसहप्रवरसाम्याद
विवाहः॥ इतिफलंतुल्यमेव॥ एतेपंचाविंत्तीनां॥ ग्रंथांतरे॥ यत्वजामद
ग्न्यावत्सानांषांक्त्र्यार्षेयएव॥ भार्गवच्यावनाप्नवानेति॥ वात्स्यानांत्र्यार्षेयः
प्रवरः॥ भार्गवच्यावनाप्नवानेति॥ वत्सपुरुधसयोः पंचार्षेयः॥ भार्गवच्या
वनाप्ननानवात्सपौरोधसेति॥ वैजवनिमथितयोः पंचार्षेयः॥ भार्गवच्या
वनाप्नवानैवैजवनैमथितेति॥ एषांपरस्परंजामदग्न्येष्वनविवाहः॥ प्र
वरसाम्यात्॥ चत्वारःसुऊभगवः॥ यस्काःमित्रयवावैन्यासुनकाश्च॥
यस्कानांत्रयःप्रवराः॥ भार्गववैतहव्यसावेतसेति॥ मित्रयवानांत्रयः॥
भार्गवदैवोदासवाध्यश्वेति॥ एकोवा॥ वाध्यश्वेति॥ वैन्यानांत्रयः॥ भार्ग
ववैन्यपार्थेति॥ ५॥ सुनकानामेकः॥ त्रोनकेति॥ ६॥ गार्त्समदेतिवा॥ ७॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

द्वौवा॥भृगुवत्समदेति॥त्रयोवा॥भार्गववैतहव्यगार्त्समदेतिवा॥८॥एषांच तृणांपरस्परंविवाहोनास्ति॥पूर्वैर्वोक्तैस्त्रिभिश्चवक्ष्यमाणैश्चास्ति॥क्वचित्तुअधिकंगण्यतेयमुक्तं॥वेदविश्वज्योतिषांआर्षेयःप्रवरः॥भार्गववैदवैश्वज्योतिषेति॥१॥शाठरमाठराणां॥भार्गवशाठरमाठरेति॥२॥भृगोःसप्तवंशानिर्णीयंतेः॥आंगिरसांतुषोडशा॥तत्रगोतमांगिरसांसप्त॥अयास्याःशरद्वंतःकौमंडाःदीर्घतमसःकारेणुपालाःकामदेवाऔशनसाश्चेति॥तत्रअयास्यानांत्रयःप्रवराः॥आंगिरसायास्यगोतमेति॥८॥शरद्वंतांत्रयः॥आंगिरसगोतमशारद्वतेति॥९॥कौमंडनांपंच॥आंगिरसऔचथ्यकाक्षीवतगोतमकौमंडेति॥१०॥दीर्घतमसानांपंच॥आंगिरसऔचथ्यकाक्षीवतगोतमदीर्घतमसेति॥त्रयोवा॥आंगिरसौचथ्यदीर्घतमसेति॥११॥कारेणुपालानांत्रयः॥ राम २

आंगिरसगोतमकारेणुपालेति॥१२॥वामदेवानांत्रयः॥आंगिरसगोतमवामदेवेति॥आंगिरसवामदेव्यबार्हदुक्थ्येतिवा॥औशनसानांत्रयः॥आंगिरसौशनसगोतमेति॥१४॥एतेबौधायनोक्ताः॥सप्तगोतमाः॥सूत्रांतरेष्वन्येपिसंतोक्ताः॥तथाहिआपस्तंबसूत्रे॥औचथ्यगोतमास्तेषांत्रयः॥आंगिरसौचथ्यगोतमेति॥१॥औत्रिजानांत्रयः॥आंगिरसौत्रिजकाक्षीवतेति॥२॥लौगाक्षिसूत्रे॥आयास्यौत्रिजागोतमास्तेषांपंच॥आंगिरसाःआयास्यौत्रिजगोतमकाक्षीवतेति॥३॥आश्वलायनसूत्रे॥रहूगणांगिरसराहूगपद्यगोतमेति॥४॥सोमराजकीनांआंगिरससौमराज्यगोतमेति॥५॥बृहदुक्थानांगिरसबार्हदुक्थ्यगोतमेति॥६॥काक्षीवतानांआंगिरसौचथ्यगोतमौत्रिजकाक्षीवतेति॥७॥गोतमानांसर्वेषांपरस्परंविवाहः॥गोत्रैक्यात्प्रायेणप्र

वरैक्याञ्च॥ ॥भरद्वाजांगिरसश्चत्वारः॥भरद्वाजा रौक्षायणागर्गाः कपय
ऋति॥तत्रभरद्वाजानांत्रयः प्रवराः॥आंगिरसबार्हस्पत्यभारद्वाजेति॥रौ
क्षयणानांपंच प्रवराः॥आंगिरसबार्हस्पत्यभारद्वाजबादनमातवचसेति॥
त्रयोवा॥आंगिरसबादनमातवचसेति॥१५॥गर्गाणांपंच॥आंगिरसबार्ह
स्पत्यभारद्वाजगार्ग्यशैन्येति॥त्रयोवा॥आंगिरसशैन्यगार्ग्येति॥भारद्वा
जशैन्यगार्ग्येतिवा॥आंगिरसतैतिरकापिऋषेतिवा॥१७॥कपीनांत्रयःप्र
वराः॥आंगिरसआमहीयवऔरुक्षयसेति॥आंगिरसबार्हस्पत्यभारद्वाजे
तिवा॥आंगिरसबार्हस्पत्यकापेयेतिवा॥१९॥एषांचतुर्णांभारद्वाजानांगो
त्रैक्यात्त्रायेणप्रवरैक्याच्चनान्वयः॥केचित्तु॥आमहीयवऔरुक्षयसप्र रम
रवसैंस्यकपेविष्णुवृद्धादिवकेवलांगिरसलंक्षीकृसभरद्वाजैःसहान्वय २

मिछंति॥तन्नादृतव्ये॥ गोत्रप्रवरमेजरीप्रयोगपारिजातस्मृत्यर्थसार
दिषुग्रंथविरोधात्॥ ॥केवलांगिरस्कपंच॥विष्णुवृद्धाःकपवारुरितार
यीतरामुद्गलाश्वेति॥विष्णुवृद्धानांत्रयःप्रवराः॥आंगिरसपौरुकुत्सत्रा
सदस्यवेति॥१९॥कण्वानांत्रयः॥आंगिरसआजमीढकाण्वेति॥आंगिरस
घोरकाण्वेतिवा॥२०॥हरितानांत्रयः॥आंगिरसआंबरीषयौवनाश्वेति॥मां
धात्रांबरीषयौवनाश्वेतिवा॥रथीतराणांत्रयः॥आंगिरसवैरूपरथीत
रेति॥आंगिरसवैरूपपार्षदश्वेतिवा॥२२॥मुद्गलानांत्रयः॥आंगिरसमा
र्म्यश्वमौद्गल्येति॥तार्क्ष्यभार्म्यश्वमौद्गल्येतिवा॥२३॥विष्णुवृद्धादीनांपं
चानामपिकेवलांगिरसांस्वंस्वंगणंहित्वान्यैःसहविवाहोस्ति॥क्वचित्तुअन्ये
पिकेवलांगिरसाःपठ्यंते॥तथाकुत्सानांत्रयः॥आंगिरसमांधातृकौत्सेति॥

एषांहरितैरविवाहः॥ हरितकुत्सपिंगशंरवदर्भसैमगवानामिसाश्वलाय
नेनसर्वप्रवरसाम्योक्तः॥ दृषद्श्वानामांगिरसपार्षदश्ववैरूपेति॥अष्ट
दंष्ट्रपार्श्वदश्ववैरूपेतिवा॥ एषांरथीतरैरविवाहः॥ प्रवरक्षयसाम्यात्॥इ
त्यमंगिरसांषोडशगणानिर्मिताः॥ ॥अत्रेश्चत्वारोभेदाः॥आद्यास्त्रयः॥
गविष्ठिराः॥वाङ्मूतकाःमुद्गलाश्चेति॥तत्राद्यात्रीणांत्रयःप्रवराः॥आत्रेय
आर्चनसश्यावाश्वेति॥२४॥गविष्ठिराणांत्रयः॥आत्रेयार्चनानसगावि
ष्ठिरेति॥आत्रेयगाविष्ठिरपौर्वातिथेतिवा॥वाङ्मूतकानांत्रयः॥आत्रेयार्चना
नसवाङ्मूतकेति॥२६॥मुद्गलानांत्रयः॥आत्रेयार्चनानसपौर्वातिथेति॥२७॥
एषांचतुर्णांपरस्परमविवाहः॥ क्वचित्तु॥अतिथीनांत्रयः॥आत्रेयार्चनान रामसआतिथेति॥धनंजयानांत्रयः॥आत्रेयार्चनानसधानंजय्येति॥सुमंग

लानांत्रयः॥अत्रिसुमंगलश्यावाश्वेति॥अत्रिवंशानिर्णीताः॥काश्यपानांत्रयो
भेदाः॥निध्रुवेरभशांडिलेति॥तत्र॥निध्रुवाणांत्रयः॥काश्यपावत्सारनैध्रुवे
ति॥२८॥रेभाणांत्रयः॥काश्यपावत्साररैभ्येति॥२९॥शांडिलानांत्रयः॥काश्यपा
वत्सारशांडिल्येति॥काश्यपावत्सारदैवलेतिवा॥काश्यपावत्सारअसितेतिवा॥
शांडिलअसितदैवलेतिवा॥काश्यपासितदैवलेतिवा॥द्वोवा॥दैवलासितेति॥
एषांत्रयाणांकाश्यपानांपरस्परंनोद्वाहः॥३०॥वसिष्ठानांचत्वारोभेदाः॥वसि
ष्ठाःकुंडिनाःउपमन्यवःपराशराइति॥वासिष्ठानांएकप्रवरः॥वासिष्ठेति॥३१॥
कुंडिनानांत्रयः॥वासिष्ठमैत्रावरुणकौंडिन्येति॥उपमन्यूनांत्रयः॥वासिष्ठेंद्रप्र
मदआभरद्वसुरिति॥३२॥पराशराणांत्रयः॥वासिष्ठशाक्त्यपाराशर्येति॥३३॥
एषांचतुर्णांवासिष्ठानांपरस्परमविवाहः॥ ॥अथविश्वामित्राः॥तेदैशा॥कु

श्रिकाः रोहिताः रौक्षकाः॥ कामकायनाः॥ धनंजयाः कताः अजाः अघमर्षणाः
पूरणाः इंद्रकौश्रिकाइति॥ तत्र कुश्रिकानांत्रयः॥ विश्वामित्रदेवरातऔदलेति॥
रोहितानांत्रयः॥ विश्वामित्राष्टकरोहितेति॥ विश्वामित्रमाधच्छंदसाष्टकेति
वा॥ द्वौवाविश्वामित्राष्टकेति॥ रौक्षायणानांत्रयः॥ विश्वामित्ररौक्षकरैवणेति॥
विश्वामित्रगाथिनरैवणेतिवा॥ कामकायनानांत्रयः॥ वैश्वामित्रदेवश्रवस
देवतरसेति॥ धनंजयानांत्रयः॥ वैश्वामित्रमाधच्छंदसधानंजय्येति॥ वैश्वा
मित्रमाधच्छंदसाघमर्षणेतिवा॥ कतानांत्रयः॥ वैश्वामित्रकास्यआलीढे
ति॥ अजानांत्रयः॥ वैश्वामित्रमाधछंदसआज्येति॥ अघमर्षणानांत्रयः॥
वैश्वामित्राघमर्षणकौश्रिकेति॥ पूरणानांद्वौ॥ वैश्वामित्रपौरणेति॥ इंद्र रात
कौश्रिकानांद्वौ॥ वैश्वामित्रऐंद्रकौश्रिकेति॥ ४४॥ एषांदशानांपरस्परमवि ५

वाहः॥ क्वचित्तुअन्येपूर्व्युक्ताः॥ पूर्वोक्तानांअजानांकुश्रिकानांत्रयः॥ वैश्वामित्रा
श्मरथ्यबांधलेति॥ हयश्वादीनांत्रयः॥ विश्वामित्रगाथिनवैणवेति॥ वेणूनांवै
श्वामित्रगाथिनवैणवेति॥ शालंकायनानांवैश्वामित्रशालंकायनकौश्रिकेति॥
रौहिणानांवैश्वामित्रमाधच्छंदसरौहिणेति॥ कथकानांत्रयः॥ वैश्वामित्रकंथ
कक्राथकेति॥ साकुलानांत्रयः॥ वैश्वामित्रसाकुलसाकुलेति॥ हिरण्यरेतसांद्वौ॥
वैश्वामित्रहैरण्यरेतसेति॥ सुवर्णरेतसांद्वौ॥ वैश्वामित्रसौवर्णरेतसेति॥ कपो
तरेतसांद्वौ॥ वैश्वामित्रकपोतरेतसेति॥ घृतकौश्रिकानांद्वौ॥ वैश्वामित्रघृतकौ
श्रिकेति॥ अगस्त्यश्रवसारः॥ इध्मवाहः॥ संभवाहः॥ सोमवाहः॥ यज्ञवाहाइति॥
इध्मवाहानांत्रयः॥ आगस्त्यदार्ढच्युतेध्मवाहेति॥ एकोवा॥ आगस्त्येति॥ सांभ
वानांत्रयः॥ आगस्त्यदार्ढच्युतसांभवाहेति॥ सोमवाहानांत्रयः॥ आगस्त्यदार्ढच्यु

तसौमवाहेति॥यत्तवाहानांत्रयः॥आगस्यदार्ढच्युतयात्तवाहेति॥एषांचतुर्णां परस्परंविवाहः॥सौमवाहासामवाहाश्चेतित्रैविध्यमुक्तमाहागस्त्या॥कात्यायनस्त्रेतुअन्येषुक्ताः॥बौधायनेनतुदार्भवाहेषुयुक्तः॥स्मार्यर्थसारेतुकेवलागस्त्येवैष्णवाहरुच्छानाभिषेकाद्दार्भवाहयत्तवाहयोस्तुलोकाऽप्रसिद्धेरगस्त्यः॥कात्यायनस्त्रेतु॥उलस्योलहृत्नांत्रयः॥आगस्यमाहेंद्रेमायोभवेति॥पौर्णमासादीनांत्रयः॥आगस्यपौर्णमासपारणेति॥दार्भवाहानांत्रयः॥आगस्यदार्ढच्युतदार्भवाहेति॥सुकृंसादीनांत्रयः॥आगस्यहैमचार्विहैमोदकेति॥पाणिकादीनांआगस्यवैनायकपाणिकेति॥तदेवंभरद्वाजगवःसप्ता॥आंगिरसःषोऽत्र॥द्वामुष्यायणेषुवक्ष्यमाणःसंकृतयोप्यंगिरसः॥तऽएके॥अत्र रात्र
यश्चत्वारः॥कक्षयापस्त्रयः॥वसिष्ठाश्चत्वारः॥विश्वामित्रंदत्रा॥आगस्तयश्च ६

त्वारः॥इत्यमेकोनपंचाशद्गणाःनिरूपिताः॥अथद्वामुष्यायणाः॥तत्रदेवरातानांत्रयःप्रवराः॥वैश्वामित्रदेवरातऔदलेति॥एषांविश्वामित्रजमदग्निभ्यांनान्वयः॥परस्परंचैवं॥त्रैयोंगत्रैशिरीणांपंच॥आंगिरसबार्हस्पत्यभारद्वाजकात्यालीलेति॥आंगिरसबार्हस्पत्यभारद्वाजत्रैयोंगत्रैशिरेतिवा॥त्रयोवा॥आंगिरसकात्याआलीलेति॥भारद्वाजकात्यालीलेतिवा॥एषांविश्वामित्रभरद्वाजाभ्यांनसंबंधः॥३॥कातानांत्रयः॥विश्वामित्रकात्याआलीलेति॥एषामपिविश्वामित्रभरद्वाजाभ्यांनान्वयः॥४॥कपिलानांपंच॥आंगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेति॥एषामपिविश्वामित्रभरद्वाजाभ्यांनान्वयः॥५॥वामरथ्यानांआत्रेयवामरथ्यपौत्रिकेति॥एषामत्रिविश्वामित्राभ्यांनान्वयः॥धौम्यनंजयानांविश्वामित्रमाधुच्छंदसधानंजय्येति॥एषामपिअत्रि

विश्वामित्राप्यांनान्वयः॥७॥जातूकर्ण्यानांत्रयः॥वासिष्ठाक्ष्येजातूकर्णेति॥एषा
मत्रिवसिष्ठाप्यांनान्वयः॥संकृतीनांआंगिरसगोरिवीतसांकृत्येति॥सांतपगौ
रिवीतसांकृत्येतिवा॥एषांस्वगणस्छैस्तथावसिष्ठैःकाश्यपैश्चनसंबंधः॥ए
षांकेवलांगिरसोमध्यपाठस्यफलंचिंत्यं॥धृतिमाषाणांसर्वसंकृतिवत्॥१॥
लोगाक्षीणांकाश्यपावत्सारवासिष्ठेति॥वासिष्ठवत्सारकाश्यपेतिवा॥एषांवसि
ष्ठैःकाश्यपैश्चनसंबंधः॥इदंलक्ष्यं॥इदानींतनानामपिदत्तकानांद्वयोरपि
पित्रोःसगोत्रैरविवाहः॥गोत्ररिक्थेजनपितुर्ममजेदित्रिमःकृतइतिमनुवच
नादत्तस्योत्सादकगोत्रसंबंधाभावेपिपित्रसगोत्रत्वप्रयुक्तप्रतिषेधात्॥अ
सगोत्राचयापितुरित्रपित्रगत्तएस्यहेतदेवप्रयोजनंस्मृतिचंद्रिकादौ रामस्थितं॥नन्वेवंदत्तपुत्रस्यपुत्रपौत्रादीनांगोत्रद्वयविवाहनिषेधोलभ्यतेइ ७

तिचेन्न॥तत्रापिपारिजातोदाहृतवचनांतरालाभाच्च॥अतएवदत्तस्यदेवरा
तस्यव्यामुष्यायणेषुगणनंसंगच्छति॥गोत्रप्रवरमंजरीकोप्याह॥एवंपुत्रिका
पुत्रदत्तक्रीतपुत्रादीनामपिद्वयोरपिगोत्रयोरविवाहः॥इति॥नचैवंगोत्ररिक्थे
इतिमनुवचनस्यनिर्विषयत्वंशंक्यं॥आर्षेयवरणाभिवादनादिषुश्राद्धदैव
तादत्तेचजनकगोत्रनिर्देशार्थत्वात्तस्येतिदिक्॥॥आपस्तंबधर्मव्याख्या
यामुज्वलनायांहरदत्तकृतांयांपेढीनसिः॥॥अथदत्तक्रीतकृत्रिमपुत्रिका
पुत्राःपरपरिग्रहेणार्षेयेणजातास्तेसंहताःकुलीनव्यामुष्यायणभवंती
ति॥इतिव्यामुष्यायणवर्गः॥॥भट्टोजीभट्टरचितोगोत्रप्रवरनिर्णयः॥गुण
गत्येर्बुधैःसोयमादरेणविभाव्यतां॥१॥गोत्रप्रवरसंदेहतमःप्राकृतचेत
सां॥मुदंतनोतुविदुषांगोत्रप्रवरभास्करः॥२॥॥इतिभट्टोजीदीक्षितरचि

विश्वामित्राभ्यांनान्वयः॥७॥जातूकर्ण्यानांत्रयः॥वासिष्ठाक्ष्येजातूकर्णेति॥एषा
मत्रिवसिष्ठाभ्यांनान्वयः॥संकृतीनांआंगिरसगोरिवीतसांकृत्येति॥सांतपगौ
रिवीतसांकृत्येतिवा॥एषांस्वगणस्थैस्तथावसिष्ठैःकाश्यपैश्चनसंबंधः॥ए
षांकेवलांगिरसोमध्यपाठस्यफलंचिंत्यं॥धृतिमाषाणांसर्वसंकृतिवत्॥१॥
लोगाक्षीणांकाश्यपावत्सारवासिष्ठेति॥वासिष्ठवत्सारकाश्यपेतिवा॥एषांवसि
ष्ठैःकाश्यपैश्चनसंबंधः॥इदंलक्षधेयं॥इदानींतनानामपिदत्तकानांद्वयोरपि
पित्रोःसगोत्रैरविवाहः॥गोत्ररिक्थेजनयितुर्मनेदत्रिमःसूतइतिमनुवच
नादत्तस्योत्पादकगोत्रसंबंधाभावेपिपित्रासगोत्रत्वप्रयुक्तप्रतिषेधात्॥अ
सगोत्राचयापितुरित्यत्रपित्रादिगणस्यैतदेवप्रयोजनंस्मृतिचंद्रिकादौ रामस्थितं॥नन्वेवंदत्तपुत्रस्यपुत्रपौत्रादीनांगोत्रद्वयविवाहनिषेधोलभ्यतेइ ७

तिचेन्न॥तत्रापिपारिजातोदाहृतवचनांतरालाभाच्च॥अतएवदत्तस्यदैवरा
तस्यद्यामुष्यायणेषुगणनंसंगच्छति॥गोत्रप्रवरमंजरीकोप्याह॥एवंपुत्रिका
पुत्रदत्तक्रीतपुत्रादीनामपिद्वयोरपिगोत्रयोरविवाहः॥इति॥नन्चेवंगोत्ररिक्थे
इतिमनुवचनस्यनिर्विषयत्वंस्यात्॥आर्षेयवरणाभिवादनादिषुश्राद्धदेव
तादत्तेचजनकगोत्रनिर्देशार्थत्वात्तस्येतिदिक्॥॥आपस्तंबधर्मव्याख्या
यामुज्वलनायांहरदत्तकृतायांपेढीनसिंः॥॥अथदत्तक्रीतकृत्रिमपुत्रिका
पुत्राःपरपरिग्रहेणार्षेयेणजातास्तेसंतुताःकुलीनद्वामुष्यायणाभवंती
ति॥इतिद्व्यामुष्यायणवर्गः॥॥महोजीभट्टरचितोगोत्रप्रवरनिर्णयः॥गुण
ग्राह्येर्बुधैःसोयमादरेणविभाव्यतां॥१॥गोत्रप्रवरसंदेहतमःप्राकृतचेत
सां॥मुदंतनोतुविदुषांगोत्रप्रवरभास्करः॥२॥॥इतिभट्टोजीदीक्षितरचि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

तानिर्णयगोत्रप्रवरभास्करः॥समाप्तः॥ ॥लेपभाजश्चयुंतुर्थापित्राद्याः
पिंडभागिनः॥पिंडदःसप्तमस्तेषांसापिंड्यंसप्तपूरुषं॥१॥ ॥भृगवः७अंगि
रसः१६संकृतयोगिरसः१अत्रेयः४अगस्यः४कश्यपाः३वसिष्ठाः४विश्वामित्राः
॥१०॥पदच्छेदःपदार्थश्चविग्रहोवाक्ययोजना॥आक्षेपश्चसमाधानंषोढा
व्याख्यानसंगतिः॥१॥भीतिर्नास्तिफुजंगभूषणवतःस्त्रीतिर्नचंद्रामृतानां
शौचंनृकपालदामलुठनाच्छौचंनगंगाजलात्॥नोद्वेगश्चितिभस्मनानहि
सुखंगौरीस्तनालिंगनादात्मारामतयाहिनाहितसमास्वच्छोहरःपातुवः॥
॥१॥श्रीरामकृष्णार्पणमस्तु॥श्रीगजाननः॥शके१७२७क्रोधननामसं
वत्सरेमाघशुद्ध५भृगुवासरेतद्दिनेपुस्तकसमाप्तः॥परमकष्टेनलिखि राम
तं॥राजेश्रीपरशरामभट्टजोगळेकरयाचेपुस्तकअसेत्॥श्रीगुरु॥ ॥ ८